प्रातःस्नानाचरणं” इति तिथ्यादितत्त्वं ॥ किञ्च “असाधारणशरीरव्यापारार्ज्जितं अविदज्ञो दातुमनिच्छन्न दद्यात्”। इति दायभागः ॥ अतुल्यं। इति शूद्रवर्गे साधारणशब्दार्थदर्शनात् ॥

असाध्यं, त्रि, ( न साध्यं साधयितुमशक्यम् ।) असाधनीयं। साधनायोग्यं। अशक्यं। असाधितव्यं। यथा,—

“सहजानि त्रिदोषाणि यानि चाभ्यन्तरा बलिं।
जायन्तेऽर्शांसि संस्कृत्य तान्यसाध्यानि निर्द्दिशेत्”॥

इति भावप्रकाशः ॥ अपि च ।

“य इदं प्रपठेन्नित्यं दुर्गानामशतात्मकं।
नासाध्यं विद्यते तस्य त्रिषु लोकेषु पार्व्वति”॥

इति विश्वसारतन्त्रे दुर्गाशतनामात्मकं स्तोत्रं ॥ (“साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा। घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम्”। “अमर्म्मोपहिते देशे शिरास्न्वस्थिविवर्ज्जिते। विकारो योऽनुपर्य्येति तदसाध्यस्य लक्षणं” ॥ इति सुश्रुतः ॥)

असाध्वी, स्त्री, (न साध्वी। नञ्समासः।) अपतिव्रता। यथा ज्योतिस्तत्त्वम्,—

“कन्यातुलाभ्यां मिथुने च साध्वी
शेषेष्वसाध्वी धनवर्ज्जिता च।
निन्द्योऽपि लग्ने द्विपदांश इष्टः
कन्यादिलग्नेष्वपि नान्यभागः” ॥ इति ।

असान्द्रं, त्रि, (न सान्द्रं निविड़ं। नञ्तत्पुरुषः।) अनिविड़ं। विरलं। इति जटाधरः॥

असाम्प्रतं, व्य, ( न साम्प्रतम् युक्तम्। नञ्तत्पुरुषः।) अयुक्तं। अनुचितं। तथा च कालिदासः।

“विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्”।

इति। कुमारे २।५५॥

(“सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुषलपाणिना”। इति माघे। “अविधाय विवाहसत्क्रियामनयोर्गम्यत इत्यसाम्प्रतम्”। इति रघौ ८। ६०।)

असारः, पुं, (नास्ति सारो यस्य।) एरण्डवृक्षः। इति शब्दचन्द्रिका॥

असारं, त्रि, (नास्ति सारो यस्य।) साररहितवस्तु। स्थिरांशशून्यं। तत्पर्य्यायः। फल्गु २। इत्यमरः॥ निःसारं ३ निष्फलं ४। इति शब्दरत्नावली॥ वात्तं ५। इति जटाधरः॥ (यथा—मनुसंहितायां ८। २०३।

“नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न चासारं न च न्यूनं न दूरे न तिरोहितम्”।
“असारे खलु संसारे चीणि साराणि भावयेत्”।

इति हितोपदेशे॥

“निर्द्धनमसाराणां लघुर्वञ्चकणं नरः।”

इति माघे॥

“बहूनामप्यसाराणां समवायो बलावहः।”

इति पञ्चतन्त्रे॥

“धिगिमां देहभृतामसारताम्।” इति रघुवंशे॥ “अतो विपरीतास्त्वसाराः” ॥ इति चरकः॥)

असारं, क्ली, नास्ति सारो यस्य।) अगुरु। इति राजनिर्घण्टः॥ (अगुरुशब्देऽस्य विशेषो ज्ञेयः॥)

असाक्षात्, व्य, ( न साक्षात्। नञ्तत्पुरुषः।) अप्रत्यक्षं। अदर्शनं। अगोचरं॥ अतुल्यं। इति साक्षात् शब्दार्थदर्शनात्॥

असिः, स्त्री, ( अस्यते अवगाहनेन पापानि दूरीकरोति या। अस + इन्।) नदीविशेषः। सा च काशीदक्षिणदिक्स्थिता। यथा।

“तस्मात् विश्वेश्वराच्चैव काशीवासेऽत्र कारणं।
असिश्च वरणा यत्र क्षेत्ररक्षाकृतौ कृते॥
वाराणसीति विख्याता तदारभ्य महामुने।
असेश्च वरणायाश्च सङ्गमं प्राप्य काशिका॥
वाराणसीह करुणामयदिव्यमूर्त्ते-
रुत्सृज्य यत्र तु तनुं तनुभृत् सुखेन।
विश्वेशवृक्षहसि यत् सहसा प्रविश्य
रूपेण तां वितनुता पदवीं दधाति॥
जातो मृतो बहुषु तीर्थवरेषु ये त्वं
जन्तोर्न जातु भवशान्तिरभून्निसज्य।
वाराणसीति गदतीह मृतोऽमृतत्वं
प्राप्याधुना मम बलात् स्मरशासनः स्यात्”॥

इति काशीखण्डे ३० अध्यायः॥

असिः, पुं, (असतीति। अस दीप्तौ इनि।) अस्त्रभेदः। खाँड़ा तरवाल इत्यादि भाषा। तत्पर्य्यायः। खड्गः २ निस्त्रिंशः ३ चन्द्रहासः ४ रिष्टिः ५ कौक्षेयकः ६ मण्डलाग्रः ७ करपालः ८ कृपाणः ९ इत्यमरः॥ प्रबालकः १० भद्रात्मजः ११ रिष्टः १२ ऋष्टिः १३ धाराविषः १४ कौक्षेयः १५ तरवारिः १६ तरवाजः १७ कृपाणकः १८ करवालः १९ कृपाणी २० शस्त्रः २१। इति शब्दरत्नावली॥ विशसनः २२। इति त्रिकाण्डशेषः॥

(“पर्णशालामथ क्षिप्रं विकृष्टासिः प्रविश्य सः।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत्”॥

इति रघुवंशे १२। ४०॥

“स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा।
वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले॥”

इति मनौ ७। १९२॥) तस्य स्तुतिर्यथा।

“असिर्व्विशसनः खड्गस्तीक्ष्णधारो दुरासदः।
श्रीगर्भो विजयश्चैव धर्म्मपालो नमोऽस्तु ते॥
इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा।
नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः॥
हिरण्यञ्च शरीरन्ते धाता देवो जनार्द्दनः।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः कृशोदरः।
भावशुद्धोऽमर्षणश्च अतितेजास्तथैव च॥
इयं येन धृता क्षौणी हतश्च महिषासुरः।
तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः”॥

इति वृहन्नन्दिकेश्वरपुराणीयदुर्गोत्सवपद्धतिधृतवाराहीतन्त्रं॥

असिकं, क्ली, (असति दीप्यते यत्। अस + इकन्।) अधरचिवुकयोर्म्मध्यभागः। इति हेमचन्द्रः॥

असिक्निका, स्त्री, असिक्नी। दासी। इति जटाधरः॥ (“गतोगणस्तूर्णमसिक्निकानां”। इति पाणिनिः।

असिक्नी, स्त्री, (न सिता शुक्लकेशा। छन्दसि क्रमेक इति तस्य क्नः नान्तत्वात् ङीप् च।) अवृद्धान्तःपुरचारिणी प्रेष्या॥ इत्यमरः॥ नदी विशेषः। इति मेदिनी॥ ( दक्षपत्नी वीरणसुता। यथा हरिवंशे। “असिक्नीमावहत्पत्नीं वीरणस्य प्रजापतेः। सुतां सुतपसा युक्ताम्” इति॥)

असिगण्डः, पुं, (अस्यते क्षिप्यते इति असिः क्षिप्त इत्यर्थः। असिः गण्डो यस्मिन्।) क्षुद्रोपधानं। इति जटाधरः॥ छोटवालिश इति भाषा॥

असितः, पुं, (न सितः शुक्लः। नञ्समासः।) कृष्णवर्णः। तद्विशिष्टे त्रि। (यथा पुष्पदन्ते॥ “असितगिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्”। “चकाशे विनिविष्टेन स सन्ध्येव निशाऽसिता”। इति रामायणे॥) इत्यमरः॥ शनिग्रहः। कृष्णपक्षः। इति हलायुधः॥ ( स्वनामख्यातः सूर्य्यवंशोद्भवो भरतपुत्त्रो राजा। यथा, रामायणे— “भरतात् तु महातेजा असितो समजायत”। स्वनामख्यातः कश्चित् व्यासशिष्यो मुनिः। यथा हरिवंशे।

“असितस्यैकपर्णा तु देवलस्य महात्मनः”।

पर्व्वतभेदः। यथा भारते,—

“तत्र पुण्यह्रदः ख्यातो मैनाकश्चैव पर्व्वतः।
बहुमूलफलोपेतस्त्वसितो नाम पर्व्वतः” ॥)

असिता, स्त्री, (न सिता। असित पलितयोः प्रतिषेधात् वर्णादनुदात्तादिति ङीप् तकारस्य क्नकारादेशश्च न।) नीलीवृक्षः। इति राजनिर्घण्टः॥ या अवृद्धा भद्रादेवीभिः प्रेष्यते अन्तःपुरे च पुनः पुन श्चरति सा। इत्यमरटीकायां भरतः॥ या अवृद्धा युवती कृष्णकेशा प्रेष्या दासी अन्तःपुरे चरति सा इति सारसुन्दरी॥ (स्वनामख्याता स्वर्वेश्या। यथा हरिवंशे।

“असिता च सुबाहुश्च सुवृत्ता सुमुखी तथा”।)

असिताभ्रशेखरः, पुं, (असितः कृष्णवर्णः अभ्रो मेघ इव शेखरो यस्य।) वुद्धविशेषः। इति त्रिकाण्डशेषः॥

असितार्च्चिः [ स् ] पुं, (असिता कृष्णा अर्च्चिः शिखा यस्य।) अग्निः। इति त्रिकाण्डशेषः॥

असितालुः, पुं, (असितः आलुः।) नीलालुः। इति राजनिर्घण्टः॥

असितोत्पलं, क्ली, (असितमुत्पलम्।) नीलोत्पलं। इति राजनिर्घण्टः॥ (यथा चरकः।

“उत्पलानि कषायाणि पित्तरक्तहराणि च” ॥)

असिदंष्ट्रः, पुं, (असिरिव तीक्ष्णा दंष्ट्रा यस्य।) जलजन्तुविशेषः। मकर इति ख्यातः। इति शब्दरत्नावली॥

असिदंष्ट्रकः, पुं, ( असिदंष्ट्र + स्वार्थे कन्।) असिदंष्ट्रः। मकरः। इति त्रिकाण्डशेषः॥

असिद्धं, त्रि, ( न सिद्धम्। नञ्समासः।) अपक्वं। अस्विन्नं। इति रत्नमाला॥ सिद्धिरहितं॥ (“स्वयमसिद्धः कथं परान् साधयेत्” इति न्यायः। न्यायमते, आश्रयासिद्धत्वादिभिर्दोषैर्दुष्टो हेतुः। यथा, भाषापरिच्छेदे।